श्री वाराहीनिग्रहाष्टकम्

देवि क्रोडमुखि त्वदंघ्रिकमलद्वंद्वानुरक्तात्मने
मह्यं द्रुह्यति यो महेशि मनसा कायेन वाचा नरः |
तस्याशु त्वदयोग्रनिष्ठुरहलाघातप्रभूतव्यथा-
-पर्यस्यन्मनसो भवंतु वपुषः प्राणाः प्रयाणोन्मुखाः || 1 ||

देवि त्वत्पदपद्मभक्तिविभवप्रक्षीणदुष्कर्मणि
प्रादुर्भूतनृशंसभावमलिनां वृत्तिं विधत्ते मयि |
यो देही भुवने तदीयहृदयान्निर्गत्वरैर्लोहितैः
सद्यः पूरयसे कराब्जचषकं वांछाफलैर्मामपि || 2 ||

चंडोत्तुंडविदीर्णदंष्ट्रहृदयप्रोद्भिन्नरक्तच्छटा
हालापानमदाट्टहासनिनदाटोपप्रतापोत्कटम् |
मातर्मत्परिपंथिनामपहृतैः प्राणैस्त्वदंघ्रिद्वयं
ध्यानोद्दामरवैर्भवोदयवशात्संतर्पयामि क्षणात् || 3 ||

श्यामां तामरसाननांघ्रिनयनां सोमार्धचूडां जग-
-त्त्राणव्यग्रहलायुधाग्रमुसलां संत्रासमुद्रावतीम् |
ये त्वां रक्तकपालिनीं हरवरारोहे वराहाननां
भावैः संदधते कथं क्षणमपि प्राणंति तेषां द्विषः || 4 ||

विश्वाधीश्वरवल्लभे विजयसे या त्वं नियंत्र्यात्मिका
भूतांता पुरुषायुषावधिकरी पाकप्रदाकर्मणाम् |
त्वां याचे भवतीं किमप्यवितथं यो मद्विरोधीजन-
-स्तस्यायुर्मम वांछितावधिभवेन्मातस्तवैवाज्ञया || 5 ||

मातः सम्यगुपासितुं जडमतिस्त्वां नैव शक्नोम्यहं
यद्यप्यन्वितदैशिकांघ्रिकमलानुक्रोशपात्रस्य मे |
जंतुः कश्चन चिंतयत्यकुशलं यस्तस्य तद्वैशसं
भूयाद्देवि विरोधिनो मम च ते श्रेयः पदासंगिनः || 6 ||

वाराही व्यथमानमानसगलत्सौख्यं तदाशाबलिं
सीदंतं यमपाकृताध्यवसितं प्राप्ताखिलोत्पादितम् |
क्रंदद्बंधुजनैः कलंकिततुलं कंठव्रणोद्यत्कृमि
पश्यामि प्रतिपक्षमाशु पतितं भ्रांतं लुठंतं मुहुः || 7 ||

वाराही त्वमशेषजंतुषु पुनः प्राणात्मिका स्पंदसे
शक्तिव्याप्तचराचरा खलु यतस्त्वामेतदभ्यर्थये |
त्वत्पादांबुजसंगिनो मम सकृत्पापं चिकीर्षंति ये
तेषां मा कुरु शंकरप्रियतमे देहांतरावस्थितिम् || 8 ||

इति श्री वाराहीनिग्रहाष्टकम् |